Total No. of Questions : 6 Total No. of Printed Pages : 2

**Code No.: BFGS-01**

# स्नातकपरीक्षाः- २०१५

## बि.ए. - विद्वन्मध्यमा - प्रथमवर्षम्

## शास्त्रम् - सामान्यशास्त्रम्

**भागः - ३, पत्रिका - ५**

**विषयः - तर्कसङ्ग्रहदीपिका**

**दिनाङ्कः** - 7-4-2015 **गरिष्ठाङ्काः** - १००

**समयः** - 10.00 A.M. to 1.00 P.M. Max. Marks - 100

---

**I. संक्षेपेण उत्तरं लिखत (दशानामेव)** **10×2=20**

१. प्रत्यक्षम् अनुमानस्य किम् उपजीव्यं भवति उत उपजीवकम् ?

२. अनुमितिलक्षणं लिखत ।

३. घनगर्जितमेघानुमितौ अव्याप्तिवारणाय पक्षतालक्षणं कथम् उच्यते ?

४. ''साहचर्यनियमः'' इत्यत्र साहचर्यपदस्य अर्थः कः ?

५. अनुमितिलक्षणस्य कीदृशे प्रत्यक्षे अतिव्याप्तिरुच्यते ?

६. अनुमानानन्तरम् उपमाननिरूपणे का सङ्गतिः विद्यते ?

७. अर्थस्मृत्यनुकूलः पदपदार्थसम्बन्धः किमित्युच्यते ?

८. शक्तिः पदार्थान्तरम् इति के वदन्ति ?

९. लक्षणावृत्तेः लक्षणं लिखत ।

१०. तार्किकैः पदानां शक्तिः कुत्र अङ्गीक्रियते ?

११. न्यायत्वं नाम किम् ?

१२. विशिष्टवैशिष्ट्यज्ञानं प्रति किं कारणं भवति ?

**II. त्रयः प्रश्नाः समाधेयाः** **3×15=45**

१. ''हेतुसामानाधिकरणात्यन्ताभावाप्रतियोगिसाध्यसामानाधिकरण्यम्'' इतीदं व्याप्तिलक्षणं सदलकृत्यं विवृणुत।

२. हेत्वाभाससामान्यलक्षणं ग्रन्थोक्तदिशा विशदयत ।

३. शक्तिग्राहकोपायान् सोदाहरणं निरूपयत ।

४. पदानां जातौ शक्तिम् अङ्गीकुर्वतां मीमांसकानाम् आशयम् अनूद्य निराकुरुत ।

५. प्रतिज्ञादीन् पञ्च अवयवान् सलक्षणं सोदाहरणञ्च निरूपयत ।

- अनुवर्तते

## III. टिप्पणीं लिखत (त्रयाणामेव) 3×5=15

१. अन्वयव्यतिरेकी

२. साधारणः

३. जहल्लक्षणा

४. अनुमितिः

५. पक्षता

## IV. वाक्यद्वयं सप्रकरणं व्याख्यात 2×5=10

१. अनुमितिम् अभिनीय दर्शयति - ''तज्जन्यम् इति ''।

२. पशमर्शं लक्षयति - ''व्याप्तिरिति'' ।

३. आप्तं लक्षयति ''अप्तस्तु' इति' ।

४. ''सा च पदार्थन्तरम्'' इति मीमांसकाः ।

## V. योग्येन योजयत 5×1=5

| | |
|---|---|
| १. तर्कसङ्ग्रहदीपिका | त्रिविधः |
| २. प्रकाशिका | पञ्च |
| ३. हेत्वाभासाः | अन्नंभट्टः |
| ४. उपाधिः | गदाधरः |
| ५. सव्यभिचारः | नीलकण्ठः |
| | द्विविधः |

## VI. रिक्तस्थानं पूरयत 5×1=5

१. पञ्चम्यन्तं .................... प्रतिपादकवचनं हेतुः ।

२. अनुमिति ............. अनुमानम् ।

३. तज्जन्यत्वे सति ............. व्यापारत्वम् ।

४. फलायोगव्यवच्छिन्नं कारणं ................ ।

५. गगनारविन्दं सुरभि अरविन्दत्वात् इत्यत्र ................ हेत्वाभासः विद्यते ।